संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

ஸம்ஸ்க்ருதஸ்ரீ:

தனி ப்ரதி விலை ரூ. 4/-

MAY 2011

A MONTHLY JOURNAL OF
SAMSKRIT EDUCATION SOCIETY

ஸம்ஸ்க்ருத கல்விக் கழகம் மாத இதழ்
212/13-1, செயிண்ட் மேரிஸ் ரோட்
மந்தைவெளி, சென்னை-28



प्रालेयाद्रिगृहं विहाय गिरिशः श्रीकामकोटेर्मठे
यद्रूपेण नतोद्धृतिं व्यतनुत स्वापाङ्गलेशैर्विभुः ।
तेषां चन्द्रसुशेखरेन्द्रयतिनां स्मृत्यै शुभायै नतैः
तन्द्रक्तैः मणिमण्डपो विरचितः क्षीरापगायास्तटे ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy
Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ஃ ✆ 24951402

THE SAMSKRIT EDUCATION SOCIETY (Regd) CHENNAI

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

President : Vaidya Sri S.V. Radhakrishna Sastri

Secretary & Treasurer : Sri G. SITHARAMAN, F.C.A.

Editor and Publisher : S. SRINIVASA SARMA
Samskritasri
43/26, Venkatesa Nagar Ist Street,
Virugambakkam, Chennai-600 092
Cell : 9094153190

பாடங்கள் நடத்துபவர்கள் :

1.	ஸ்ரீ லோகநாயகி ஸ்ரீநிவாஸன்,	ஆழ்வார்ப்பேட்டை	24353597
2.	ஸ்ரீமதி மாலதீ பாலசுப்ரமண்யம்,	மேடவாக்கம்	9884158110
3.	ஸ்ரீமதி சாந்தி அசோக்	மந்தைவெளி	24951402
4.	ஸ்ரீமதி கௌரீ கருணாகரன்,	மைலாப்பூர்	24320544
5.	ஸ்ரீமதி ரமாசுந்தரராஜன்,	சென்னை-95	65687635
6.	ஸ்ரீமதீ பார்வதீ ராமசந்திரன்	அண்ணா நகர்	26215719
7.	ஸ்ரீ R. முத்து கிருஷ்ணன்	கொரட்டூர்	26248430
8.	ஸ்ரீ S. ரங்கநாத சர்மா,	சேலையூர்	22291720
9.	ஸ்ரீமதி புவனேச்வரீ	ராஜகீழ்பாக்கம்	9841212047
10.	ஸ்ரீ K. ராஜேச்வரீ	மாடம்பாக்கம்	9962837319
12.	ஸ்ரீ S. ஹரிஹரன்	நங்கைநல்லூர்	9841403859
13.	ஸ்ரீ V. பாலாஜி	சானிடோரியம்	9840695773
14.	ஸ்ரீ S. அனந்தன்	சானிடோரியம்	9894709418
15.	ஸ்ரீ K.S. கோபாலகிருஷ்ணன்	குரோம்பேட்டை	9840119221
16.	ஸ்ரீ N. பரத்வாஜ்	திருமுல்லைவாயில்	26360396
17.	ஸ்ரீ P.R. சுப்ரமண்யம்	K.K. நகர்	23640864
18.	ஸ்ரீ N. ஜானகீ ராமசாஸ்த்ரீ	I.T.I. கிண்டி	24953144
19.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய	ஸ்ரீரங்கம்	2430632
20.	ஸ்ரீமதீ ராஜம் சுந்தர்	திருநெல்வேலி	9488326850
21.	ஸ்ரீ T.V. ஸ்ரீநிவாஸ தாதாசார்ய	காஞ்சீபுரம்	27269153
22.	ஸ்ரீ A. சுப்ரமண்யசர்மா	திருவானைக்காவல்	2231343
24.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன்,	திருநின்றவூர்	9445703470
25.	ஸ்ரீ S. திருமலை,	காஞ்சீபுரம்	97895 84125
26.	ஸ்ரீ R. ரங்கநாதன்	காஞ்சீபுரம்	97910 55428
27.	ஸ்ரீ C.A. ஏகாம்பரம்	கோயம்புத்தூர்	0422-2233242

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला: : 33 MAY-2011 पुष्पम् 7

कलि : 5109 खर - वृषभमासे 33—7

The Samskrit Education Society Established with the blessings of His Holiness SRI MAHASWAMIGAL of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:

No.283, T.T.K.Salai Alwarpet, Chennai-18, and Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.

PRESENT ACTIVITIES

1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI
Founder Editor
Vaidyasri
S.V. RADHAKRISHNA SASTRI,
Hon. Editor.
Dr. N. VEEZHINATHAN
Editor and Publisher
Dr. S. SRINIVASA SARMA

Hon. Academic Advisors :
Dr. K. SRINIVASAN,
Vivekananda College, Chennai
Dr. Devi Prasad
Madras Sanskrit College,
Dr. P.S. Ramamoorthi
Egmore Sanskrit School

Associate Editors :
Pandit S. Ranganatha Sarma, Chennai
Prof. G. Srinivasu, Kanchipuram
Prof. C.V. Seshadri, Chidambaram

अन्यापदेशाः । 2
तिरुक्कुरल्-
संस्कृतश्लोकरूपानुवादः । ... 4
विक्रमार्कचरितम् । 6
चौर्य-वधादिवैयग्र्यम् । 9
व्यवहारे उपयोगीति पदानि । ... 11
सर्वज्ञशङ्करम् नाटकम् । 14
श्री वेङ्कटेशस्तोत्रम् । 17
MAHASWAMIGAL SPEAKS. ... 23
गोपीभक्तिः । 24
भयापह श्रीशिवषोडशनामाष्टकम् । 27
महाशास्तृकवचम् । 29
SCSVMV - University 30
वन्दे सूत्रभाष्यकृतम् । 32
चाणक्यो राक्षसश्च । 35
दुष्करं राजसेवनम् । 39

SUBSCRIPTION RATES

ANNUAL :	Rs. 40/-
LIFE SUBSCRIPTION	Rs. 400/-
Page Donation	Rs. 200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer,
The Samskrit Education Society (Regd.) .
Old 212/13-1, St.Mary's Road, Mandaiveli,
Chennai - 600 028. Ph: **044-2495 14 02**

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अन्यापदेशाः ।

—श्री.सुन्दरराजः, I.A.S. (Retd.) भुवनेश्वरम् ।

रोधोरोधितरङ्गनीरभरितं दूरे सरो दृश्यते
उष्णं पुष्णति पूष्णि शुष्यति मुखे मुष्णामि तृष्णां ततः ।
इत्यालोच्य नखंपचे मम सखे ! किं सैकते धावसि
मिथ्यैषा मृगतृष्णिकेति सलिलभ्रान्तिप्रदा धन्वनि ।।

वाहं वाहनचालक त्वमियता वेगेन मा चालय
त्वद्वेगेन भिया द्रवन्तमभितो दृष्ट्वा जनं मा हस ।
मार्गे पश्य महाशिलां निपतितां संघट्टनाद्वा तया
सद्यो वा गतिवक्रणस्खलनतो नश्येः पतित्वाऽवटे ।।

तन्वि ! त्वं परिधाय सूक्ष्मवसनं सर्वाङ्गनग्ना यथा
तन्वाऽतिस्फुटया न भासि तनुना मध्येन मध्येसभम् ।
मन्वाना किमतोऽसि विश्वविदिता त्वं सुन्दरी स्या इति
नन्वेवं करणेन नश्यति यशः शीलं कुलं तेऽखिलम् ।

किं ते वृद्ध ! वयः कृषीवल सखे !ऽशीतिः कुतः श्राम्यसि
पोतं रोपयितुं नवं फलतरोः दाता कदाऽयं फलम् ? ।
प्रायो द्वादशवर्षतः परमियत्कालं त्वया जीव्यते
जीवेयं यदि खादिताऽस्मि मम सा खादेन्न चेत्सन्ततिः ।।

कर्कन्धूफलसेवनेन मधुनः पानेन वा काक ! किं
नित्यं वा गुडसेवनेन मधुरो जायेत कण्ठस्तव ? ।
कर्णारुन्तुदमेकमेव रटनं काकेति काकेति ते ।
वर्णः केवलमस्ति कोकिलसमः कर्णप्रियो न स्वरः ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मूढौ पश्य सखे ! परस्परमितः पुंस्कुक्कुटावाग्रतः
उत्पत्य क्षतजारुणौ परुषितौ भूत्वैकजात्यावपि ।
स्वामिभ्यां विहितः पणो विजयिनो यः कुक्कुटस्योपरि
तं स्वामी विजयी हरिष्यति तयोर्लाभो व्रणः केवलम् ॥

पक्षौ ते भवतश्शहामृग तथाप्युड्डीयसे व्योम्नि नो
पादौ दीर्घतमौ तथाऽपि मृगवद्वेगेन नो धावसि ।
भूम्यां छादयसे कदाऽपि वदनं स्वं चेत् समस्तं जगत्
भूयादस्तमितं मते तव कथं मूर्खस्त्वमेवंविधः ॥

आवासाद्विवराद्बहिर्निजनिजात् आविर्मदा आखवः
आयातास्सदनाङ्गणेऽद्य विदधत्यानन्दतो नर्तनम् ।
आधावन्नभितो महान् खलु सपद्यामोद आकस्मिकः
आखूनां कदनं चकार स यतो वृद्धो बिडालो मृतः ॥

उत्पश्यस्युपवासकर्शिततनुश्चन्द्रोदयं त्वं निशि
व्यात्तास्येन चकोर पारणयितुं चन्द्रांशुमुत्कण्ठया ।
चन्द्रो दर्शयति त्वरां न सुहृदि त्वय्यादरेणोदये
छन्नस्सन्नुदितो मेघपटले क्लिश्नाति स त्वां पुनः ॥

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

கல்வியை யொத்த கண் வேறில்லை, உண்மைக் கொப்பான தவம் வேறில்லை. பற்று கொள்வதற்கு ஒப்பான துன்பம் வேறில்லை, த்யாகத்திற்கு இணையான சுகம் வேறில்லை.

—ஸுபாஷிதம்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तिरुक्कुरल् - संस्कृतश्लोकरूपानुवादः ।

—श्रीकलियन् रामानुजजीयर् स्वामी, वानमामलै मठम्, नाङ्गुनेरी।

அதிகாரம் 18- வெஃகாமை

अगृधुत्वम् (परधनेच्छाविरहः)

நடுவின்றி நன்பொருள் வெஃகின் குடிபொன்றிக்
குற்றமும் ஆங்கே தரும் 1

अन्याय्यतामनालोच्य परवित्तपरिग्रहे ।
स्पृहा चेत्कुलनाशाय नैकदोषेभ्य एव च ।। १

படுப்பன் வெஃகிப் பழிப்படுவ செய்யார்
நடுவன்மை நாணு பவர் 2

अनीत्या लज्जमाना ये सन्तस्ते सन्ततं भुवि ।
न निन्द्याचरणं कुर्युः परद्रव्यजिघृक्षया ।। २

சிற்றின்பம் வெஃகி அறன் அல்ல செய்யாரே
மற்றின்பம் வேண்டுபவர் 3

संस्पृह्यस्थिरमानन्दं परवित्तापहारजम् ।
स्थिरानन्देप्सवस्सन्तो नाधर्म्यं कुर्युरत्र वै ।। ३

இலம் என்று வெஃகுதல் செய்யார் புலம்வென்ற
புன்மைஇல் காட்சியவர். 4

जितेन्द्रियाश्च निर्दुष्टदृष्ट्या सज्जना इह ।
निजनिर्धनभावेन न परस्वस्पृहावशाः ।। ४

அஃகி அகன்ற அறிவு என்னும் யார் மாட்டும்
வெஃகி வெறிய செயின் 5

परस्वं स्पृहयन् सर्वेष्वाचरेदविवेकतः ।
कुकर्माणि, ततः किं स्यात् शास्त्रसूक्ष्मधिया फलम् ।। ५

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

அருள் வெஂகி ஆற்றின் கண் நின்ருன் பொருள் வெஂகிப்
பொல்லாத சூழ்க்கெடும். 6

गृहस्थधर्मनिष्ठस्सन् ईशकारुण्यकाङ्क्षया ।
परवित्तस्पृहो दुष्टचिन्तयाऽत्र विनश्यति ।। ६

வேண்டற்க வெஂகி ஆம் ஆக்கம் விஃளவயின்
மாண்டற்கு அரிதாம் பயன் 7

न वाञ्छेत् परसम्पत्तिं ग्रहीतुं गृध्नुतावशात् ।
तद्भोगकाले दुष्टं स्यादत्यन्तं तत्फलं भुवि ।। ७

அஂகாமை செல்வத்திற்கு யாதெனின் வெஂகாமை
வேண்டும் பிறன் கைப் பொருள் 8

सम्पत्याः क्षयशीलाया अक्षयत्वं तदेव हि ।
यत्सम्पदि परेषां स्यात् निःस्पृहत्वं महीतले ।। ८

அறன் அறிந்து வெஂகா அறிவுடையார்ச் சேரும்
திறன் அறிந்து ஆங்கே திரு 9

मत्वा धर्मं परद्रव्यनिस्स्पृहान् सन्मतीन् नरान् ।
सत्पात्राणीति सम्मान्य श्रीर्देवी श्रयते भुवि ।। ९

இறல் ஈனும் எண்ணுது வெஂகின் விறல் ஈனும்
வேண்டாமை என்னும் செருக்கு. 10

अनालोच्य परद्रव्यगृधुता नाशदायिनी ।
परसम्पदगृधुत्वसम्पद्धि विजयावहा ।। १०

अनुग्रहाय भूतानां मानुषं देहमास्थितः ।
भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ।।

ஸ்ரீ க்ருஷ்ணர் மனித உடம்பை ஏற்றுக் கொண்டு லீலைகள் புரிவது மக்களுக்கு அனுக்ரஹம் செய்வதற்கே. அத்தகைய லீலைகளைப் படித்தும் கேட்டும் அனைவரும் க்ருஷ்ணன் பால் ஈர்ப்பு கொள்ளலாம். —பாகவதம் - 10.33.37

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पुनरपि भोजे समागत्य सिंहासनसोपाने पदं विन्यस्यति, पञ्चमी सालभञ्जिका निवार्य गिरं एवं व्याजहार – ''विक्रमे महीं पालयति सति एकदा कश्चित् रत्नवणिक् समागत्य अनर्घं एकं रत्नं राजहस्ते समर्पितवान् । राजा दीप्यमानं तत् आदाय तस्मै भूरि द्रव्यं दत्वा 'भोः सार्थवाह ! किं ईदृशं अन्यत् अस्ति? इत्यपृच्छत् । वणिक् देव ! न अत्र किमपि अस्ति ! ग्रामे तु दश विद्यन्ते । यदि अपेक्षा देवस्य, तर्हि प्रेषयिष्यामि' इति उवाच । अनन्तरं राजा तेषां एकैकस्य चतुस्सहस्रं सुवर्णानि मूल्यं निर्णीय तावन्ति धनानि दत्वा, सहैव तेन चतुरं एकं भृत्यं प्राहिणोत् । 'अष्टभिः दिवसैः अत्र आगन्तव्यम्' इति च आदिदेश । सः अपि 'यत् आज्ञापयति देव' इति तदाज्ञां शिरसि कृत्वा झटिति निर्जगाम । रत्नानि गृहीत्वा समागच्छति च तस्मिन् मध्येमार्गं महती वृष्टिः समभवत् । तदा च उभयकूलंकषा नदी एका प्रवहति स्म । सः तदुत्तरं तीरं गन्तुं अशक्नुवन् नाविकं आहूय अवदत् - 'नाविक ! रत्नहारं मां इमां नदीं उत्तारय इति । नाविकः प्राह–' अये पथिक ! एषा नदी वेलां अतिक्रम्य प्रवहति; कथं उत्तार्यताम् । किं च महानद्युत्तरणं बुद्धिमता वर्जनीयम् । तथा च आहुः–

महानदीप्रतरणं महापुरुषविग्रहम् ।

महाजनविरोधं च दूरतः परिवर्जयेत् ।। इति ।

भृत्यः 'अये कर्णधार ! यत् उक्तं त्वया तत् सत्यमेव । तथाऽपि यदि अहं अद्य एव रत्नैः सह देवस्य पादमूलं न गच्छेयम् तदाज्ञाभङ्गात् राजा मां निग्रहीष्यति । अतः अवश्यं इदानीं मां उत्तारयितुं अर्हसि'

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इति अवदत्। 'तर्हि पञ्च रत्नानि यदि मह्यं दास्यसि, त्वां उत्तारयिष्यामि' इति नाविकः जगाद। ततः भृत्यः तस्मै पञ्च रत्नानि दत्वा, नदीं उत्तीर्य, राजसमीपं आगत्य, सविनयं प्रणम्य, पञ्च रत्नानि तस्मै ददौ। तदा राजा अब्रवीत् 'कुत्र अवशिष्टानि पञ्च रत्नानि?' इति। भृत्यः सर्वमपि वृत्तान्तं यथावत् अभिधाय, एतत् आकर्ण्य देवः प्रमाणं इति व्याहृत्य विरराम। राजा तु तद्वचनं श्रुत्वा परं सन्तुष्टः अवशिष्टानि अपि रत्नानि तस्मै प्रादात्। भृत्यश्च परमानन्दभरितः स्वगृहं अगात्।

इति कथां कथयित्वा सालभञ्जिका भोजं आह - 'यदि एवं-विधं औदार्यं त्वयि विद्यते, तदा उपविश' इति। तत् आकर्ण्य भोजः तूष्णीं न्यवर्तत।

1. கடின பதங்கள்— निगार्य = தடுத்து, गिरं = வார்த்தையை, गीः गिरौ गिरः, गिरं गिरौ गिरः என்று (ஸ்த்ரீலிங்க ரூபம்) व्याजहार = கூறியது, अनर्घ्यं = விலைமதிக்க முடியாத, விலையுயர்ந்த, दीप्यमानं = பளபளக்கின்ற, एकैकस्य = ஒவ்வொன்றுக்கும், चतुरः = கெட்டிக்காரன், मध्येमार्गं = வழி நடுவில் (मार्गस्य मध्ये) उभयकूलंकषा = இரு கரைகளையும் தொட்டு ஓடுகின்ற, नाविकः, कर्णधारः = படகு செலுத்துபவன், वेला = நதியின் (நீர் நிலையின்) கரை. निग्रहीष्यति = தண்டித்து விடுவார், यथावत् = உள்ளதை உள்ளபடியே.

2. उपसर्ग = (உபஸர்க்கங்கள்) க்ரியா பதங்களுடன் (முன்) சேர்க்கப்படுவன. அவை அக்கிரியாபதத்தின் அர்த்தத்தை அப்படியே வலியுறுத்திச் சொல்ல உதவும், அல்லது அக்கிரியா பதத்தின் அர்த்தத்தை மாற்றி வேறு அர்த்தத்திற்கு

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

கொண்டு செல்லும். हृ என்ற தாதுவின் பொருள் 'எடுத்துச் செல்லுதல்' என்பது. அத்துடன் प्र, आ, सं, वि. परि முதலிய உபஸர்க்கங்களுடன் சேர்த்துச் சொல்லும் பொழுது प्रहारः = அடித்தல், आहार = உட்கொள்ளுதல், संहार = வதைத்தல், विहारः = விளையாடுதல், परिहार = கழிவு செய்தல் என்றபடி பொருள் மாறுபடும். இந்த பாடத்தில் वि + आ + जहार = கூறினன் என்றும் निर् + नी = தீர்மானித்தல் என்றும், सं + आ + गम् = என்பதற்கு வந்து என்றும், नि + ग्रह = தண்டித்தல், नि + वृतु + திரும்பிப் போதல் என்றும் மாறுபட்டுள்ளன.

3. वि + आ + जहार जह्रतुः जह्रुः (लिट्) लटि- हरति। सार्थं समूहं वहति नयति इति सार्थवाहः = வியாபாரி. उभे कूले कषति इति = उभयकूलंकषा। नावा तरति इति = नाविकः। पन्थानं गच्छति इति - पथिकः। नि + ग्रहीष्यति लृट्। लटि. गृह्णाति। लुङ्. अग्रहीत्। वि + रराम विरेमतुः विरेमुः। रमु क्रीडायाम् - लिट्। लटि विरमति। இது ஆத்மனேபத தாது. ஆனல் இங்கு व्याङ्परिभ्यो रमः, उपाच्च = என்ற பாணினி சூத்ரப்படி பரஸ்மைபதம் வந்துள்ளது கவனிக்கத்தக்கது.

4. शतृ, शानच् என்ற ப்ரத்யயங்கள் நிகழ் கால வினையாலணையும் பெயர் (Present active participle) गच्छति > गच्छन्, पठति > पठन्, धावति > धावन्, शक्नोति > शक्नुवन्। शानच பிரத்யங்கள் – ஆத்மனேபத க்ரியா பதங்களுடன் சேர்க்கப்படுபவை, वन्दते > वन्दमानः, ताड्यते > ताड्यमानः, गृह्यते > गृह्यमाणः, दीप्यते > दीप्यमानः, रमते > रममाणः என்ற உதாஹரணங்களைக் கவனிக்கவும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चौर्य-वधादिवैयग्र्यम् ।

—मधुकरः ।

प्राचीनकाले सौकर्याभावात् कदाचित् कचिदेव चौर्यं, वधादय समभवन् । वेदर्षीणां, महात्मनां च काले चौर्यमेव नासीत् इति श्रूयते । अद्यतनकाले तु सर्वत्र सर्वदा चौर्यं अन्या च वधादिमहाघोरवार्ता विशिष्य स्त्रीषु अत्याचाराश्च इति दिने दिने पत्रिकासु पठामः । यदा तु सौकर्यं भवति तदा क्षणमात्रविलम्बमपि विना आसुरकृत्येषु प्रवर्तितुं सुख्यग्राः जनाः इति उच्छृङ्खलता अभिव्यक्ता भवति । तैत्तिरीयब्राह्मणे एवं पठ्यते । नक्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिनीस्तस्कारा अरण्येष्वाजायन्ते (३.९)

छान्दोग्येऽपि सुस्पष्टं महात्मानः प्रतिजानते—

न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।
नानाहिताग्निर्ना विद्वान् न स्वैरी स्वैरिणी कुतः? इति ।

रघुवंशे दिलीपस्य यशो गायं गायं कविशेखरः कालिदासः न तृप्यतीव। नेदं वर्णनाचातुर्यं तस्य, परन्तु वस्तुस्थितिस्तादृशी । यतो दिलीपस्तादृश आदर्शभूतो रक्षिता समजनि । तस्य महाकवेः दिलीपकृतरक्षणभरण पाटवर्णनं शृण्वतामस्माकं, अपि नाम भर्वेत्तादृशकालस्थितिः, रक्षणव्यग्रता चाद्यापि? इति सम्प्रतीक्षा जायते एव । महाकवेर्वाक्यमेतत् मनाक्पठत—

न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ।। इति ।

यस्मिन् देशे अचौर्यं, सर्वेषां परमोद्देश्यं सम्भावनापदं चाभूत् तस्मिन्नेवास्मद्देशे, सौकर्याभावाभावं सम्पाद्याद्य प्रत्यहं प्रतिपल्लि प्रतिनगरं च सम्पद्यते ईदृशी दुर्घटना, तत्र को वाच्यः ? अकार्ये प्रवृत्ते, ज्ञातेऽपि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इदन्तया, कौर्मव्रतिका इव मन्दं मन्दं विचार्य कांश्चित्, अविचार्यैव कांश्चिदपराधिन इति गृहीत्वा तेषां दण्डनं क्रियेत यदि तावता किं कृतं भवति। घोरे कर्मणि प्रवृत्तानां दण्डनं यद्यप्यवश्यं कर्तव्यं तथाऽपि ततो निवृत्तिपरत्वसम्पादनं प्रधानीभवति। तत्र समुचितोपदेशकरणं तदनुसरणं च समीचीनौ उपायौ। तादृशः उपदेशः तादृशमनुसरणं च सर्वजनोपयोगितया कैः कथं घटनीयमिति तु चिन्तनीयम्।

मातेव पुत्र मनुबोधयति श्रुतिर्हि
लोकं समस्तमपि योजयितुं सुखेन।
तस्मात् श्रुतेः अभिहितार्थमतन्द्रितेन
चित्तेन साधयितुमत्र जना यतध्वम्॥

Just as a mother instructs her child, (with affectionate care in a gentle and persuasive manner) in the same way, the Upanishad teaches (that the Free nature of every being is the self Which is bliss and it alone is fit to be realized) With the sole aim of directing every one to realiz eone's Truee nature and thereby remain in the form of bliss. Hence O men ! being not indolent set out on an earnest quest for the self with the mind focused on it.

—Atmavidyavilasa

Compare : तस्मात् नास्िककुदृष्टिं, कुतार्किकभेदृष्टिं च उज्झित्वा मातापितृसहस्रेभ्यः अपि हितैषिणा वेदेन उपदिष्टमात्मतत्त्वं शान्तदर्पैः आदरणीयम्।

—कठोपनिषदि शाङ्करभाष्ये २.१.१५

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

व्यवहारे उपयोगीति पदानि । (अनुवर्तते)

மரங்கள்

शमी = வன்னி

शमीरः (अल्पा शमी) = சிறுவன்னி

मदनः = மருக்காறை

एरण्डः = ஆமணக்கு (मण्डः)

दारुः = தேவதாரு

प्रियङ्गुः = ஞாழல்

पाटला = பாதிரி மரம் (சிவப்பும் வெளுப்புமான பூவுள்ளது)

अमृता = நெல்லி (आमलकी)

अक्षः = தானிமரம் (विभीतकः)

पनसः = பலாமரம் (कण्टकिफलः)

अव्यथा = கடுக்காய் மரம் (हरीतकी)

कर्णिकारः = முள்ளு முருங்கை

सरलः = ஸரவ மரம்

गर्दभाण्डः = கல்லொளி

जीवकः = வேங்கைமரம்

लिकुचः = ரஸ எறுமிச்சை

निचुलः = நீர்க்கடம்ப மரம்

फल्गुः = பேயத்தி மரம்

शिरीषः = வாகை மரம்

निम्बः = வேப்ப மரம்

पिचुमन्दः = வேப்பமரம்

चम्पकः = சம்பகமரம் (हेमपुष्पकः)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गन्धफली = சண்பகமொக்கு (एतस्य कलिका)

नागकेसरः = நாக கேஸரமரம்

चाम्पेयः = சம்பதேசத்து மரம்

कणिका = முன்னை மரம்

वैजयन्तिका = தழுதாழை

करमर्दकः = பெருங்களாச் செடி

कुटजः = வெட்பாலை

तमालः = பச்சிலை மரம்

सिन्दुकः = நொச்சில் மரம்

श्रीहस्तिनी = வேலிப்பருத்தி

महासही = வாடாகுறிஞ்சி

कुमारी = கத்தாழை

नवमालिका = இருவாக்ஷி

तृणशून्यम् = மல்லிகை (मल्लिका)

अस्फोटा = காட்டுமல்லி (वनोद्भवा)

निर्गुण्डी = கருநொச்சில்

श्वेतसुरसा = வெண்ணைச்சில்

वासन्ती = குருக்கத்தி

यूथिका = முல்லை

हेमपुष्पिका (सा पीता) = மஞ்சள் நிறமுள்ளமுல்லை

झिण्टी = முட்குருஞ்சி

बाणा = கருப்புக் குருஞ்சி

कुरवकः = சிவந்த பெருங்குருஞ்சி

करवीरः = அலரி

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Digitized by Arya Samaj Foundation Chennai and eGangotri Sri Mariharan Collection, Sholinganallur, Chennai

कुन्दम् = குருந்தமரம்

करीरः = தூதுவளை

धुत्तूरः = ஊமத்தை (उन्मत्तः)

फलपुरः = கும்மடி மாதுளை (मातुलुङ्गः)

जम्बीरः = கிடாரை (समीरणः)

पर्णासः = கறுப்புக் கஞ்சாங்கோரை

बुकः = கொக்குமந்தாரை

जीवन्तिका = பில்லூரி

गुडूची = சீந்தற்கொடி

अर्कपर्णः = எருக்கு

अलर्कः = வெள்ளெருக்கு

अपामार्गः = நாயுருவி

एकोऽप्यनेक इव भाति शरीरभेदात्।
आत्मा घटादिगतभेदवशात् वियद्वत्।
देहेन्द्रियादिषु चलत्सु निजप्रकाशात्
पूर्णोऽपि निश्चलतरोऽपि विकारवद्वत्॥

The self although one appears to be many owing to different psycho physical organisms that condition it. This is similar to space which although one appears to be manifold, Whan conditioned by different limiting adjuncts such as pat, jar and the like.

The self is absolute and is free from any activity, but when the psycho physical organisam which is manifested by its light functions it also appears to be active and is subject to modification.

—Sri Sadasivabrahmendra, Atmavidya Vilasa
Courtesy : The Voice of Sankara

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वज्ञशङ्करम् नाटकम् ।

——डा.कैप्पल्लि केशवन् नम्बूदिरि, कोट्टयम् ।

नेत्राण्येव हि सूर्यचन्द्रदहना यस्याम्बरं कौञ्जरं
सद्यः कृत्तकठोरशोणमजिनं गङ्गाप्यहो मूर्धनि ।
योगी यस्त्विह शं करोति च सतां कैरातरूपोऽपि यः
श्रेयो वः सततं दिशेन्निखिललोकानन्ददः शङ्करः ॥

(नान्द्यनो ततः प्रविशति सूत्रधारः)

सूत्रधारः - *(नेपथ्याभिमुखमवलोग्य)* आर्ये ! यदि आहार्य - संविधानमवसितम्, इतस्तावत्.....

नटी - *(प्रविश्य)* आर्य ! इयमस्मि ।

सूत्रधारः - आर्ये ! अचिरादतीतं शिशिरम् । शिशुरिव मृदुपदन्यासैः पुष्पहासो वसन्तः समागच्छति । सहृदयानां सज्जनानां परिषदियम् । अस्मिन् रमणीये दिने श्रीशङ्करचरितमधिकृत्य विरचितं सर्वज्ञशङ्करं नाम नाटकं जनमनोनयनानन्दप्रदं भवेदिति मन्ये ! भवति ! प्रवृत्तमात्रस्य वसन्तस्य विश्वमोहनतामधिकृत्य सामाजिकानां तोषाय गीयतां तावत् ।

नटी - तथा *(गायति)*

पुष्पविकासमृदुस्मितसुभगं फुल्लाम्बुजदलनयन सुरम्यम् ।
वल्लीकुलनटनोत्सवधन्यं वीक्षे मोहननव्यवसन्तम् ॥

सूत्रधारः - आर्ये ! साधु गीतम् । सामाजिकाः किं नाटकं प्रतीक्षन्ते अद्य? तानेव पृच्छामि तावत् । भोः वरिष्ठसामाजिकाः किं नाटकं प्रतीक्षन्ते भवन्तः ? *(श्रुतिं अभिनीय)* साधु साधु!

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मदुक्तं मयैव विस्मृतम्। आर्ये !
कैप्पल्लिकुलजातेन केशवेन विनिर्मितम्।
सर्वज्ञशङ्करं नाम नाटकं काङ्क्ष्यते जनैः ॥

नटी - हृद्यमेतत्। भवता परामृष्टं नाटकमेव ते काङ्क्षन्ते। किमनन्तरं कर्तव्यमिति आज्ञापयतु भवान्।

सूत्रकारः - किमपरम् ! नटान् यथावसरं रङ्गे प्रवेशयितुं रत्नः क्रियताम्।

नटी - आर्य ! तथा *(इति निष्क्रान्ता)*

सूत्रकारः - अस्तु तावत्। अहमपि मत्कर्तव्यं पालयामि। अयमत्र स्नानानन्तरं पूर्णा तीरे शङ्करस्य वयस्यः प्रियदर्शन इव। *(इति निष्क्रान्तः) (इति प्रस्तावना।)*

प्रथमोऽङ्कः

(प्रातःकालः। केरलेषु पूर्णानद्याः तीरम्। केचित् तीरवृक्षाः स्नानघट्टसमीपे भिन्नभिन्नस्थानेषु स्थिताः।

स्नानानन्तरं कश्चित् बालः स्नानघट्टात् प्रतिगच्छति। स सद्यः स्थित्वा उदितमात्रं बालार्कं वीक्ष्य बद्धाञ्जलिः प्रार्थयति।)

बालः - भुवननयनपद्मं प्रातरुन्मीलयन्तं
कनककरविलासैः प्राणिनो जीवयन्तम्।
सकलतनुभृतां यःशं करोति, ज्वलन्तं
प्रकटवदनमीडे ब्रह्मणस्तं महान्तम्॥

नमः सवित्रे। नमः प्राणजीवनाय पवनाय। नमोऽस्तु अमृतवाहिन्यै पूर्णानद्यै। *(पुनर्गन्तुमुद्युक्तः आलोक्य)* अहो मे वयस्यः शङ्करो मात्रा सह स्नातुमागच्छति। अद्य तयोः स्नानकालस्य कश्चित् विलम्बः अभवत्। कुत एवम्?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पृच्छामि तावत्।

बालः - नमो मात्रे। वयस्य शङ्कर ! कृतस्नानोऽहम्। किमद्य विलम्बोऽभवत् तव स्नानस्य ?

शङ्करः - प्रियदर्शन वयस्य ! अतीतरात्रौ एकं सुदीर्घं स्वप्नदर्शनं ममासीत् यस्मिन् महर्षिसङ्घैः अन्यैः सुजनैश्च आवृताः केचित् दिव्यपुरुषाः आजुहुवुर्माम् तथा सर्वजनांश्च इति मन्ये। मन्द्रगम्भीरध्वनिभिस्तैरेवं उद्घोषितं च 'वत्स ! चिरं जीव यशसा। चक्षुरुन्मीलय सर्वेषां, आत्मसुखं वितर सर्वेभ्यः। एकमेव स्थितं अन्यानि सर्वाणि तस्य विवर्तनानि' दर्शनान्ते दिव्यपुरुषास्तु परिवारैः सह तारका इव विहायसि तिरोहिताः। तदनन्तरं गाढनिद्रायां निलीनं मां उत्थापयितुं मम सुखसुषुप्तिभङ्गाशङ्कया माता नोद्युक्ता। तथाऽपि पक्षिणां मधुरालापनैरहं स्वयमेवोत्थितोऽस्मि किञ्चित्कालविलम्बेन। स्वप्नदर्शनं सुखदर्शनमेव अस्माकं बालानां न दुःस्वप्नश्चेत्।

प्रियदर्शनः - स्वप्नदर्शनस्य वैचित्र्यं रसावहमेव। ममाप्येकः स्वप्नो गतवारेऽभवत् यस्मिन्नहं सागरं तरन्निव अभवम्। सुखावहं च उद्वेगजनकं च तद्दर्शनम्। गच्छामि प्रियवयस्य गच्छामि *(प्रियदर्शनो निष्क्रान्तः)*

माता वत्स ! गच्छ अग्रे गच्छ। युवयोः स्वप्नदर्शनकथे पुनरपि विलम्बं कुरुतः।

शङ्करः - मातः ! प्रथमं जले अहमवतरामि।

माता - सूक्ष्मं निरीक्ष्य अवरोह। अतिनिम्नस्थानानि सन्ति स्नानघट्टे। मन्दं अवरोह। *(अनुवर्तते)*

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्री वेङ्कटेशस्तोत्रम् ।

—Trans : Dr. T. Narayanakutty, S.Chakrapani

Kalavenu-ravaavaSa-gopavadhoo-
Sathakoti-vrthaath-smarakoti-samaath
prathi-vallavik-aabhimathaath-sukhadaath
vasudeva-suthaan-na param kalaye

Grammar : वसुदेवस्य सुतः = वसुदेवसुतः, तस्मात् = वसुदेवसुतात् । वसुदेवसुतात् + न = वसुदेवसुतान्न

Prose Order :

कलवेणुरवावशगोपवधूशतकोटिवृतात् स्मरकोटिसमात् प्रतिवल्लविकाभिमतात् सुखदात् वसुदेवसुतात् (अहं) परं न कलये ।

Meaning :- कलवेणुरवावश = spell bound by the melody of His flute, गोपवधू शतकोटिवृतात् = than the One surrounded by hundreds of crores of cowherd women, स्मरकोटिसमात् = than the One having beauty equal to crore cupids, प्रतिवल्लविका = to each one of those women, अभिमतात् = than the One who is dear, सुखदात् = than the One who gives comfort and pleasure, वसुदेवसुतात् = the One who is the son of Vasudeva, परं न कलये = I do not reckon any one else for my salvation.

Explanation : 5. I do nor reckon any one else for refuge than the One surrounded by hundreds of crores of cowherd women attracted by the gentle, mellifluous, melodious sound of His flute, One endowed with beauty

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

equal to that of crores of Manmatha's. One dear to and pleasing equally each and every Gopika (cowherd woman) and the son of Vasudeva.

अभिराम गुणाकर दाशरथे जगदेकधनुर्धर धीरमते ।
रघुनायक राम रमेश विभो वरदो भव देव दयाजलधे ।। ६

abhiraaama-guNaakara ! daaSaraThe !
jagadeka-dhanurdhara ! dheeramathe!
raghunaayaka ! raama ! rameSa! vibho !
varado bhava ! deva ! dayaa-jaladhe !%%

Grammar : अभिरामाः गुणाः = अभिरामगुणाः, अभिरामगुणानां आकर इव अभिरामगुणाकरः, तस्य सम्बद्धौ = अभिरामगुणाकर । दशरथस्य अपत्यं पुमान् = दाशरथिः, तस्य सम्बुद्धौ = दशरथे । जगति एकद्यासौधनुर्धरश्च जगदेकधनुर्धधरः, तस्य सम्बुद्धौ = जगदेकधनुर्धरः ।

Prose Order : अभिरामगुणाकर ! दाशरथे ! जगदेकधनुर्धर ! धीरमते ! रघुनायक ! हे राम ! रमेश विभो ! देव ! दयाजलधे ! वरदः भव !

Meaning : हे अभिरामगुणाकर ! = O Treasurer house of noble and pleasing qualities ! हे दाशरथे ! = O Son of Dasaratha ! हे जगदेकधनुर्धर ! = O the only mighty archer to protect the world ! हे धीरमते ! = O the valourous One ! हे रघुनायक ! = O hero of the Raghu race ! हे राम ! = O Rama ! हे रमेश विभो ! = O Lord of goddess Lakshmi ! हे देव ! = O Lord ! हे दयाजलधे ! = O Ocean of Mercy ! वरदःभव ! = May You be a giver of boons (Please protect me) !

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Expalanation : 6. O The treasurer hourse of pleasing and auspicious qualities ! Rama, the Son of Dasaratha ! Matchles Archer, second none in the world ! The valiant One ! Hero of the Raghu dynasty ! Rama ! Consort of the Goddess Mahalakshmi ! Lord ! O Ocean of Mercy ! Be a Granter of boons !

अवनीतनयाकमनीयकरं रजनीकरचारुमुखाम्बुरुहम् ।
रजनीचरराज तमोमिहिरं महनीयमहं रघुराममये ।। ७

avanee-thanayaa-kamaneeya-karam
rajaneekara-chaaru-mukhaambu-ruham
rajaneechara-raaja-thamo-mihiram
mahaneeya-maham raghuraama-maye.

Prose Order : अवनीतनयाकमनीयकरं रजनीकरचारुमुखाम्बुरुहम् रजनीचरराजतमोमिहिरं महनीयं रघुराममम् अहं अये !

Meaning : अवनीतनया = daughter of Mother Earth, Sita, कमनीयकरं = One who captivated with His beauty, रजनीकर = the moon, maker of night, चारुमुखाम्बुरुहम् = louts like face equaling th beauty of, रजनीचरराज = Ravana, the king of demons, तमोमिहिरं = destroyer of darkness / sorrow, महनीयम् रघुराममम् = the great Delight of the Raghu race, अहम् अये = I worship for salvation.

Explanation : 7. I worship and reckon for refuge the One bestowed with the beauty with the beauty that bewitched Sita. the daughter of Mother Earth. One

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

having a beautiful face like the moon. One that annihilated the demon king Ravana and dispelled the sorrow (darkness) from the world.

सुमुखं सुहृदं सुलभं सुखदं स्वनुजं च सुकाययमोघशरम् ।
अपहाय रघूद्वहमन्यमहं न कथञ्चन कञ्चन जातु भजे ।। ८

sumukham suhrdam sulabham sukhadam
svanujam cha sukaaya-mamoghaSaram
apahaaya raghoodvaha manya-maham
na kaThanchana kanchana jaathu bhaje.

Grammar : शोभनं मुखं यस्य सः = सुमुखः, तं = सुमुखम् । सुखं ददातीति सुखदः, तं = सुखदम् । शोभनः कायः यस्य सः = सुकायः, तं = सुकायम् । अमोघः शरः यस्य सः = अमोघशरः, तम् = अमोघशरम् । रघुकुलमुद्वहति इति रघूद्वहः, तं = रघूद्वहम् । सुकायम् + अमोघशरम् = सुकाययमोघशरम्; रघूद्वहम् + अन्यम् + अहं = रघूद्वहमन्यमहं

Prose Order : सुमुखं सुहृदं सुलभं स्वनुजं च सुकायम् अमोघशरम् च रघूद्वहम् अपहाय अहम् अन्यम् कथञ्चन कञ्चन जातु न भजे ।

Meaning :- सुमुखं = that one who has a beautiful face, सुहृदं = the One who has a kind heart for the devotee, सुलभं = the One who is easily available to those, seeking His refuge, सुखदं = the One who gives divine bliss, happiness, सु अनुजं = the One whohas very good brothers, च सुकायम् and the One who has a beautiful body, अमोघशरम् = the One who has an unfailing arrows,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अपहाय = leaving, रघूद्वहम् = the One who took the name of the Raghu dynasty to new heights, अहम् = I. अन्यम् = other, कथञ्चन = some how (by any way), कञ्चन = any one, जातु न भजे = not at all worship.

8. I never worhsip anyone else other than the One, who is having a plesant face, a kind heart, loving borthers, beautiful body and unfailing arrow, One, who is easily accessible to those seeking refuge, One, who benevolently conforts those in distress, and the One, who took the name of the Raghu dynasty to new heights.

विना वेङ्कटेशं न नाथो न नाथः
सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे वेङ्कटेश ! प्रसीद प्रसीद
प्रियं वेङ्कटेश ! प्रयच्छ प्रयच्छ ।। ९

vinaa venkateSam na naTho na naTha:
sadaa venkateSam smaraami smaraami
hare ! venkateSa ! praseeda praseeda
priyam venkateSa ! prayachccha prayachccha !

Prose Order :- वेङ्कटेशं विना (मम) न नाथः न नाथः । (अहं) प्रियं वेङ्कटेशं सदा स्मरामि स्मरामि । हे हरे ! हे वेङ्कटेश ! प्रसीद ! प्रसीद ! हे वेङ्कटेश ! प्रयच्छ ! प्रयच्छ !

Meaning : वेङ्कटेशं विना = excepting Lord Venkatesa, न नाथः न नाथः = (for me) there is no master, प्रियं वेङ्कटेशं =

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

the dear Lord Venkatesa, सदा स्मरामि स्मरामि = I always meditate on, हे हरे ! = O Lord Hari ! हे वेङ्कटेश ! = O Lord Venkatesa ! प्रसीद ! प्रसीद ! May you be kind ! Bless me ! हे वेङ्कटेश ! = O Lord Venkatesa ! प्रयच्छ ! प्रयच्छ ! = Grant me boon ! Fulfill all m\" desires !

Explanation : 9. O Hari ! I have no Lord and refuge other than You ! I always think of and mediate on Him for salvation. O Lord Venkatesa ! Be kind to me ! Grant me grace and fulfil all my desires !

नेष्टव्यं प्रसभं लब्धुं युक्तं प्रार्थनयेप्सितम् ।
प्रार्थनाऽपि भवेद्गर्ह्या सा चेदसमये कृता ।।

விரும்பியது எதையும் வன்மையால் அடையக் கூடாது. கேட்டுப் பெறுவதே நல்லது. கேட்பதும் தவருன நேரத்தில் அமைந்தால் இகழத் தக்கதே !

—ஸுபாஷிதம்

कल्हारश्रीमञ्जरीपुञ्जरीतिं धिकुर्वन्तीमम्ब ! पाटलिम्ना ।
मूर्तिं ध्यात्वा शाश्वतीं भूतिमायन् इन्द्रो राजा जगतो य ईशे ।।

தாமரையழகு முழுவதையும் தனது செவ்வழகால் தூசாக்கி விளங்கும் நுமது வடிவமைப்பை ஹே தாயே ! எவனொருவன் த்யானம் செய்து அழிவற்றச் செல்வத்தைக் கைவசப்படுத்திநிற்கிருனே அவனல்லவோ உலகமனைத்தையும் ஆளப்பிறந்த இந்த்ரனுவான் !

—ஸ்ரீ ஆதிசங்கரர் - த்ரிபுர சுந்தரீ வேத பாதஸ்தவம் 24.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

MAHASWAMIGAL SPEAKS.

—P. JAGADEESAN, SCSVMV)

The four objects of human aspiration are called purusharthas. They are Dharma, Artha, Kama and Moksha of these Dharma is the first and Moksha is the last. As Dharma is the gateway to Moksha the ultimate goal of human beings.

Moksha gives peace, joy, strength and traquility whcih are essential for perfect discipline in life it leads of enlightenement namely realisation of brahman within which is the ultimate truth and knowledge leading to moksha that means eternal bliss and libration from the cycle of birth and death.

For a human being dharma has tenfold characteristics namely Sanatana, Samanya, Vishesha, Varnasrama, Svadharma, Yuga Dharma, Kula Dharma, Manava Dharma, Purusha Dharma, Stri Dharma, Raja Dharma, Praja Dharma, Pravriti Dharma and Nivritti Dharma.

All these relate to contentment, forgiveness self-restriant non-stealing, purity control of senses discrimation between right and wrong the real and the unreal spritual knowledge, truthfulness and absence of anger.

सुजनोऽपि कुप्यति तरां अनवसरज्ञेन याचितः सुहृदा।

நல்லிதயம் படைத்த நண்பனுயினும் தருணமறியாமல் வந்து யாசிப்பானேயாகில் நல்லவனும் அவனிடம் கோபம் காட்டுவான்.

—ஸுபாஷிதம்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गोपीभक्तिः ।

—उण्णि नम्बूदिरिः, ओट्टूर्।

पूर्णे पुराणकथने सहसैव भट्ट-
पादाभिधः सकलभागवतावतंसः ।
उत्थाय जातपुलकः पवनेश्वरस्य
नत्वा पुरो भुवि सगद्गद मित्थमूचे ।।

यत्पादरेणुषु लुठन्त्यृषयोऽपि शुद्धचै
यासां करेषु भगवानपि दारुयन्त्रः ।
वाचां विदूरसुकृताद्भुतवैभवाभ्यः
ताभ्यो नमः सकलगोकुलपुंश्चलीभ्यः ।।

बृन्दावनं कुमुदसौरभवासितेषु
चन्द्रातपस्नपितयामुनसैकतेषु ।
गोपाङ्गनाकुचपटे विलसत्पटीरे
तिष्ठन् सुखं व्यरणयन्मुरलीं मुरारिः ।।

गृह्णामि सारमखिलोपनिषद्गणानां
पश्यामि पारमपि शास्त्रमहाम्बुधीनाम् ।
राधाधरे तु हरिणा मुहुरर्पितानां
नावैमि तत्त्वमतिकोमलचुम्बनानाम् ।।

मायामचिन्त्य घटनामवयामि यत्नात्
ज्ञेयाश्च कर्मगतयो विविधास्तथाऽपि ।
राधाकुचाग्रपरिरंभणकेलिकाले
कृष्णाननोत्थपुलकार्थमहं न जाने ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit S.V.V. Hariharan Collection, Sholinganallur, Chennai

भावग्रहोऽति सुगमः शिशुजल्पितानां
स्पष्टं मम प्रणवमन्त्रनिगूढवाच्यम् ।
किं तु, त्वया सरसमन्त्रशतस्य राधा-
कर्णोदितस्य गहनार्थमहं न वेद्मि ।।

वीक्षे परस्परविभिन्नमतैककण्ठ्यं
वक्ष्ये प्रयोजनमनेककलाजनीनाम् ।
गोपीमनोज्ञचिकुरे तु न नैष्ठकस्य
जाने सुमानि तव चूडयतश्चिकीर्षाम् ।।

हृद्धागगोचरमखण्डमहस्सुवेद्यं
जय्या सुपर्वपतिदुर्लभयोगभूमिः ।
मुह्यामि ते पुनरपि प्रणयापराधात्
राधां प्रसादयितुमानमतः प्रवृत्तौ ।।

सर्वं च वेद्मयहमिदं न तथाऽपि वेद्मि
बृन्दावनेषु यमुनासित सैकतेषु ।
चन्द्र प्रभाविशदशारदशर्वरीषु
राधामुकुन्दकृतकालगभीरतत्त्वम् ।।

वैकुण्ठलोकविभवान् बहु वर्णयामि
वैराजपूरुषगुणान् गणयाम्यथापि ।
नाहं प्रभुः किमपि वक्तुमहैतुकीं तां
अन्याद्दशीं हरिरतिं प्रति वल्लवीनाम् ।।

लोके समस्तविधवस्तुसहस्रकाणां
कालेन पारगमने न महान् प्रयासः ।
भक्तेश्वरप्रणयबन्धसुगन्धभूम्नः
पारं परं कलयितुं न तु पारयामः ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सेनाबलेन सुगमं भुवनाधिपत्यं
यज्ञादिभिः समनुभोक्तुमलं सुरौकः ।
ज्ञानं च साधनचतुष्टयतो लभेत
भक्तिः कथं समुदियादिति नैव जाने ॥

यज्ज्ञानतो भवति नाकसुखं विनिन्द्यं
यत्प्रापणेन विरजेदपुनर्भवेऽपि ।
उन्मत्ततां व्रजति यत्कणिकानुपानात्
तां भक्तिमेव दिश मे मरुदालयेश ! ॥

यत्सन्निधौ श्वपचवत् विषयो बिभेति
यच्छासनामखिलसिद्धिरवेक्षते हि ।
मुक्तिः सदा परिचरत्यमलं यदङ्घ्रिं
तामेव वा देहि भगवंस्त्वयि भक्तिमेकाम् ॥

योगीन्द्रैरपि यस्य सुन्दरमुखं हृत्पङ्कजे नेक्ष्यते
यद्वेणुक्वणितामृतं रसयितुं शक्रादयो नेशते ।
वेदो यस्य पदाब्जरेणुकणिकां स्प्रष्टुं वृथा क्लिश्यते
गोपीनां करपल्लवे विहरति स्वैरं परं ब्रह्म तत् ॥

यथा यथा चेयं चपला दीप्यते,
तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्गमति ॥

மிகவும் அசைந்தாடுகின்ற / தன் நிலைகொள்ளாத செல்வப் பெருக்கு எவ்வளவுக் கெவ்வளவு ஒளிர்கின்றதோ அவ்வளவுக் கவ்வளவு தீபச் சுடர்போல் கடுங்கருப்புக் கல்கமேயான (இழிவான) செயலைத் தானே உமிழ்கிறது !

—பாணபட்டர் - காதம்பரீ 105

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vidwan Pandit Sriram Sharma Collection, Sholinganallur, Chennai

भयापह श्रीशिवषोडशनामाष्टकम् ।

——मूलम् - भृङ्गिरिटिसंहिता ।

औषधे ओषधीशं च कानने कालिकापतिम् ।
खेगतो गगनावासं गमने शिवदं परम् ।।

जलमध्ये जलेशं च दुःप्ने दुःखनाशकम् ।
पर्वते पार्वतीनाथं पावके पाटलांशुकम् ।।

प्रियदर्शे प्रकृतीशं च प्रवासे प्राणनायकम् ।
प्रसवे मातृभूतं च विवाहे सुखदं भवम् ।।

भोजने जीर्णकर्तारं शयने रसिकेश्वरम् ।
सर्वकाले सदाशंम्भुं सङ्कटे कष्टनाशकम् ।।

एवं ध्यायेत्तत्र तत्र सुखं च लभते ध्रुवम् ।

* * *

भयापहश्रीशिवाषोडशनामाष्टकम् ।
भिषक्तमीमौषधे च कानने कालिकां वराम् ।
खेगतौ गगनावासां गमने शिवशङ्करीम् ।।

जलमध्ये जलेशीं च दुःस्वप्ने दुःखनाशिनीम् ।
पर्वते पार्वतीं देवीं पावके पाटलांशुकाम् ।।

शिवप्रियां प्रियदर्शे प्रवासे प्राणनायिकाम् ।
श्रीमातरं प्रसवे चैव विवाहे सर्वमङ्गलाम् ।।

भोजने जीर्णकर्त्रीं च शयने रसिकां शिवाम् ।
सदाकाले सर्वभद्रां चिन्तयेत् भक्तिसंयुतः ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V. Hariharan Collection, Sholinganallur, Chennai

इति भयापहश्रीशिवापोडशनामाष्टकम्।

कश्चन महाकविः—

लक्ष्मीं राजकुले, जयां रणमुखे, क्षेमङ्करीमध्वनि
क्रव्यादद्विपसर्पभाजि शबरीं कान्तारदुर्गे गिरौ।
भूतप्रेतपिशाचजृंम्भभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे ॥

{बहु परिश्रम्य, संकलय्य प्रेषितवन्तः - सोमसेतुदीक्षिताः पण्डितवराः चिदम्बरात्}

वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः।
परधर्मेण जीवन् हि सद्यः पतति जातितः ॥

குணமற்றதாயினும் ஸ்வதர்மம் சிறந்தது. நன்ருக அனுஷ்டித்தாலும் பிற தர்மம், சிறந்தது அன்று. பிற தர்மத்தைக் கடைபிடித்து வாழ்பவன் தன் நிலையிலிருந்து உடனே வீழ்ச்சி அடைகிறுன்.

—மனுஸ்ம்ருதி 10.97

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे धनं श्रेयः परधर्मो भयावहः ॥

நன்கு கைக்கொள்ளப்பட்ட பிறருடைய தர்மத்தைக் காட்டிலும் குணக் குறையிருப்பினும் தன்னுடைய தர்மம் மிகவும் உயர்ந்தது. தத்தம் தர்மத்தை கடைபிடிப்பதில் இறக்க நேரிடினும் அது மேன்மையே தரும். ஆனல் பிறருடைய தர்மம் பயத்தை விளைவிக்கும். —பகவத் கீதை 3.35

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

महाशास्तृकवचम् ।

—मूलम् - गुह्यरत्नचिन्तामणिः

ओं क्रूं नमः पराय गोप्त्रे नमः स्वाहा ।

ओं नमो भगवते रुद्रकुमाराय आर्याय हरिहरपुत्राय महाशास्त्रे हाटकाचल कोटि सुमधुरसार महाहृदयाय हेमजाम्बूनदरत्नसिंहासनाधिष्ठिताय - वैडूर्यमणिमण्डपक्रीडागृहाय - लक्षाकुङ्कुमजपाविद्युत्तुल्यप्रभाय - प्रसन्नवदनाय - उन्मत्तचूडामिलितलोलमाल्यावृतवक्षस्तम्भमणिपादुकामण्डपाय - प्रस्फुरन्मणिमण्डितोरुकर्णाय - पूर्णालङ्कारबन्धुरदन्ति निरीक्षिताय - कदाचित् कोटिवाद्यादिनिरन्तराय - जय शब्दमुखरनारदादिदेवर्षि चक्रप्रमुखलोकपालकुलोत्तमाय - दिव्यास्त्रपरिसेविताय - गौरोचनागरुकर्पूरश्रीगन्धप्रलेपिताय - विश्वावसुप्रधानगन्धर्वसेविताय - श्रीपूर्णा - पुष्कला - उभयपार्श्वसेविताय सत्यसन्धाय महाशास्त्रे नमः - मां रक्ष मां रक्ष । भक्तजनान् रक्ष रक्ष । मम शत्रून् शीघ्रं मारय मारय । भूतप्रेतपिशाचब्रह्मराक्षसयक्षगन्धर्व परप्रेरिताभिचारकृत्यरोग-प्रतिबन्धकसमस्तदुष्टग्रहान् मोचय मोचय । आयुर्वित्तं देहि मे स्वाहा । सकलदेवता आकर्षय आकर्षय । उच्चाटय उच्चाटय । स्तम्भय स्तम्भय । मम शत्रून् मारय मारय । सर्वजनं मे वशमानय वशमानय । सम्मोहय सम्मोहय । सदा आरोग्यं कुरु कुरु स्वाहा । ओं शान्तिः शान्तिः शान्तिः

सर्वे जनाः सुखिनो भवन्तु । समस्तसन्मङ्गलानि सन्तु । अयं धर्मः उत्तरोत्तरमभिवर्धताम् । सर्वं श्रीकृष्णार्पणमस्तु ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA, ENATHUR-631 561

ADMISSIONS to SANSKRIT COURSES 2011 - 12

1. Master of Arts (Sanskrit) :- With specialisation in Vyakarana, Nyaya, Sahitya and Advaita Vedanta. This Post Graduate programme is designed for helping the students to appear NET examination cunducted by UGC. Choice based Credit system is adopted. The course is covering Grammar, Indian Philosophy, Sanskrit Literature, Alankara Sastra and Darsanas.

* Scholarship for dayscholars (Rs. 1,500/-) or Free accommodation & Free meals for hostellers.
* Duration - 2 years - Semester Pattern.

Eligibility : Pass in B.A. Degree course in the branch of Sanskrit of any recognised university (or)

* Any Bachelor degree with working knowledge in Sanskrit subject to satisfying the norms of the University.

2. Bachelor of Arts (Sanskrit)

This Under Graduate programme is designed to make the students familier with the world of Sanskrit. Choice Based Credit system is adopted. The course is covering Grammar, Indian Philosophy, Sanskrit Literature, Alankara Sastra and Darsanas along with the components of English, Hindi and Computer Science.

* Scholarship for dayscholars (Rs. 1,300/-) or Free accommodation & Free Meals for hostellers.
* Duration - 3 years - Semester Pattern

Eligilbility : * Pass in +2 or its equivalent of any recognised university.

3. Research Programmes (Sanskrit)

M. Phil. (Ful Time) * Scholarship for dayscholars (Rs. 1500/-) or Free accommodation & Free Meals for hostellers.

Eligibility : * Pass in PG Degree in Sanskrit with 55% of marks **Ph.D (Full Time / Part Time) Disciplinary / Inter - Disciplinary**

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy.

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

* Scholarship for fultime Researchers (Rs. 2000/- Eligiblility : * Pass in PG Degree in Sanskrit with 55% of marks

HIGHLIGHTS

* Separate Hostels for Boys and Girls, * Well equipped Library , * Schollarship for all

* Internet facilities, *Medium of teaching - Sanskrit.

Course offered inIndian Culture Tourism & Archeaology * Diploma (Duration : 1 year, Eligibility : Any Graduation)

* M.A. (Duration 2 years, Eligibility : Any Graduation, Pattern : Semester) * M.Phil., (Duration : 1 year, Eligibility : Post Graduation, Pattern : Semester) * Ph.D. (Eligibility : Any Post graduation with 55% of Marks).

Application Fee Rs. 100/- (One hundred only) And Rs. 50/- for SC/ST Application Form and Prospectus can be obtained

In Person by paying prescribed fee by cash/demand draft in favour of "The Registrar, SCSVMV" payable at Chennai, From :

* The University Campus at Enathur, Kancheepuram, * The University Liaison Office, #98/99, Luz Church Road, Mylapore, Chennai-600 004. Ph: 044-24983072., * The Sri Jayendra Saraswathi Ayurveda College, Nazaratpet, Poonamallee, Chennai - 602 103. Ph: 044-26492649. * The Sankara Health, Education and Charitable Trust, Plot No. 6, Gokulam Colony, Anna Salai, Pammal, Chennai - 600 075, Ph: 044-22483678/5430. can be downloaded from **www.kanchiuniv.ac.in** to be sent along with the prescribed fee by demand

Filled in applications can be sent to

The Chairman, Admission 2011—12, SCSVMV University, Enathur, Kancheepruam631 561 Tamilnadu

Last date for receipt of filled in application **15th July 2011**

Contact Nos. : **Dr. G. Srinivasu, 09894643836, Dr. Debajyoti Jena, 09443854916, Dr. Manoranjan Senapathy, 09566401127**

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वन्दे सूत्रभाष्यकृतम् ।

—शान्ता लोकनायिका श्री, चेन्नै ।

भगवत्पादनामके ज्ञानभास्करे उदिते, तदानींतनावैदिक-मततमांसि तिरोऽभूवन्, मतान्तरैः प्रचार्यमाणायथार्थान्धकारः अस्तमयाच्च । तरुणे वयसि सन्न्यासं स्वीकृत्य सद्गुरुभ्यः गोविन्द-भगवत्पादेभ्यः श्रुतिवाक्यानां याथार्थ्यमवधार्य युक्तिपूर्वं वादप्रतिवादैः अन्यमतस्थान् प्रहस्य आसेतुहिमाचलं द्विवारं क्रममाणाः अद्वैतमेव सत्यमिति लोके प्रतिष्ठापयामासुः ।

भगवत्पादानां शिष्येष्वन्यतमः पद्मपादः भगवत्पादं यथा विशेषितवान् तदनुसारं आचार्यः अपूर्वशङ्करः एव आसीत् । नूतनदार्शनिकं किञ्चित् विरच्य तस्य बोधनं जने कर्तव्यमित्येतन्न आचार्याणां प्रयासः । श्रुतिवाक्यार्थस्य किंचिद्विच्युतिसंभावनयाऽप्यसहमताः परं सामान्यमानवानां अवगमनाय तत्र तत्र विवरणे कञ्चित् परिष्कारं उपपादितवन्तः आचार्यवर्याः ।

शङ्कराचार्यावतारात् प्रागेव केचन पूर्वाचार्याः अद्वैतसिद्धान्तं अवबुध्यन्तः व्यराजन्त । परं तैः ग्रन्थरूपेण यत् किञ्चित् विरचितं वा इति सुस्पष्टं न जानीमहे, गौडपादाचार्यप्रणीतमाण्डूक्यकारिकायाः ऋते । पूर्वाचार्याः पिपठिषूनेव योग्यान् अध्यापयन्तः तृप्तिं लेभिरे ।

परं शङ्कराचार्याः सनातनधर्मस्य प्रचारः कथं जनानां मध्ये सम्पादयितव्यः इति सम्यक् विचार्य ग्रन्थरचनायां, मठस्थापने, अनुयायिरूपीकरणे च व्याप्रियमाणाः, वेदसंरक्षणं एव जीवितस्य

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai
महत्कृत्यमिति मनसि। तत् कृते सोत्साहं प्रयतितवन्तश्च। वेदशीर्षाणां उपनिषद् ग्रन्थानां जीववाक्येभ्यः एकैकं वाक्यं उद्धृत्य महावाक्यरूपेण जिज्ञासुभ्यः मननाय उपदिश्य तदभ्यासेन आनन्दरसानुभवमासाद्य परमात्मनि ते एकीभावं प्राप्नुयुः इति तेषां दृढं मतमसीत्।

ग्रन्थरचना इत्युक्ते—

मुमूक्षूणां कृते, सात्विकगृहस्थानां कृते, मध्यमेश्वरविश्वासिनां कृते इति विविधतया ग्रन्थान् विरचयामासुः।

साधनचतुष्टयसम्पत्तेरनन्तरं ब्रह्मविद्यायाः श्रवणमननिदिध्यासनादीनां समुचिताभ्यासाय प्रस्थानत्रयभाष्यं श्रुत्यधिष्ठितं, प्रपञ्चे दृश्यमानदृष्टान्तपूर्वकं, युक्त्याधारितं च सूत्रकृतां वेदव्यासमहर्षीणां मतानुसारेणआचार्यपादैः सूत्रभाष्यं व्यरचि। लोके सर्वे तत् साधकाः भवितुं न योग्याः भवेरन् इति मत्वा प्रकरणग्रन्थान् प्रणीय, तानपि, ग्रहीतुं अक्षमेभ्यः अवगन्तुं यथावत् ज्ञातुं च उपासनया भक्तिभावं जनयितुं मन्त्रतन्त्रशास्त्राणि, सर्वा देवताः प्रस्तुत्य श्लोकानपि कारुण्यवन्तः आचार्यवर्याः रचितवन्तः।

भारते सर्वत्र संचार्य, चतुर्वेदरक्षणार्थं मठान् प्रतिष्ठाप्य, तत्र स्वोद्बोधितान् विश्वस्तान् शिष्यान् नियोजयामासुः। वेदार्थेषु दृढविश्वासेन धर्मप्रचारकरणे निर्बाधं निष्प्रयासं अग्रेसरणाय अशकन् भगवत्पादाः, यद्यपि प्रारम्भकाले विघ्नबाहुल्यमतिक्रान्तव्यमासीत् तैः। ते षड्दर्शनान्यपि आदृतवन्तः, चित्तशुद्धये कर्मकाण्डस्य अनुसन्धानं अत्यावश्यकम् इति स्वीकृतवन्तः, फलासक्तिं विना काम्यकर्मकरणेन जिज्ञासुः कथंचिदपि चित्तशुद्धिं प्राप्नुयादिति निरचिन्वत।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पूर्वाचार्याः प्रपञ्चं स्वप्नमिव मिथ्येति प्रवक्तारः परमात्मज्ञानमेव पारमार्थिकं उद्बुद्धवन्तः उद्बोधयन्तश्चासन्। परं शङ्कराचार्य पादाः यद्यपि श्रुत्यनुरोधं प्रपञ्चं स्वप्नमिव मिथ्येति अजानन् परं व्यावहारिकतया सत्यं प्रपञ्चमिति स्वकार्यं प्रयक्षतया ज्ञायमानत्वादिति भाष्ये प्राकाशयन्। अनेनोपदेशेन एते पूर्वाचार्येभ्यः व्यत्यस्ताः इति जनाः सादरं तदुपदेशान् अनुष्ठातुं तत्परा अभवन्। एवं अद्वैतसिद्धचै सिद्धान्तसमर्थनाय अत्यन्तापेक्षिताः अंशाः अथवा उपायाः तैः मानवेभ्यः प्रदत्ताः अतः भारतीयाः अद्वैतमतस्य उपज्ञातृत्वं तस्मै अर्पितवन्तः। जीवस्वरूपविचारः, विवर्तवादः इत्यादि अनेकवादान् उपक्षिप्य वेदवाक्यानां निजमतमाविष्कृतवन्तः आचार्यभगवत्पादाः आचन्द्रार्कं वैदिकैः सादरं स्मर्यन्ते, तेषां पूजाऽपि विधास्यते प्रतिवर्षं शङ्करजयन्ती महोत्सवकाले । वयमपि ज्ञानलाभार्थं आचार्यचरणारविन्दयोः प्रणमेम।

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः॥

முள்ளு முருங்கை / தங்கப்பட்டிப் புஷ்பம், நிறம் மிக்கதாகத்தான் இருக்கிறது, ஆனால் மணமில்லாததால் நம் மனம் வாடுகிறதே. (இது மட்டுமா) இன்னும் எத்தனையோ இடங்களில், குணங்களை எல்லாம் ஒன்று சேரப் படைக்கும் விஷயத்தில், பரம்மதேவனின் படைக்கும் திறன், பின் நோக்கித் தானேயுள்ளது!

—காளிதாஸர் - குமார ஸம்பவம் 3-28

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चाणक्यो राक्षसश्च ।

—मधुकरः ।

मुद्राराक्षसनाटकं सकलमपि नाटकलक्षणमनुसरति अथवा नानुसरति इत्यादिविचार - विमर्शेषु नेदानीमवसरः । एकावली-व्याख्यां तरलायां मल्लिनाथः 'निषेधो मुद्राराक्षसाद्यसत्काव्यपरतया व्यवस्थापनीय' इति मुद्राराक्षसमसत्काव्यकोटावेव निक्षिपति । अन्यैः भट्टनायककृतं वेणीसंहारनाटकं सकलमपि नाटकलक्षण-मनुसरति इति, भगवतो वासुदेवस्योत्कर्षप्रतिषादनपरं इति च कैश्चित्कारणैः बहुश आद्रियते । मुद्राराक्षसं तु न तथा इत्यत्र भगवत्सम्बन्धाभाव एव हेतुः स्यात् । 'कुटिलं नयमनुसृत्य लोकनियमनं' - कुतः नाद्रियते । महाभारतादौ तादृशरीतिः आस्तिकैराद्रियत एव - इत्यादिकं अन्यदा अन्विष्य विचारणीयम् । इदानी मत्र मुद्राराक्षसनायकप्रतिनायक योः गुणतारतम्यमात्रं प्रस्तूयते ।

अप्रतिग्राहकाणां विशालवंशानां भूसुराणां कुले जातश्चाणक्यः। निरीहाणामीशस्तृणमिव तिरस्कारविषयः (III.16) इति कञ्चुकिवचः चाणक्यस्यार्थनैरपेक्ष्यं विशदयति । अत एवैत तद्गृहं राजाधिराजमन्त्रित्वेऽपि - उपलशकलमेतद्भेदकं गोमथानां वटुभिरुपहृतानां बर्हिषां स्तूपमेतत् । शरणमपि समिद्भिः शुष्यमाणाभि रामिःविनमितपटलान्तं दृश्यते जीर्णकुड्यम्' इति कञ्चुकिना तृतीयाङ्के वर्ण्यते । कर्मठत्वमपि अस्माद्व्यज्यते ।

राक्षसस्तु कुलक्रमागतोऽमात्यः । पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः । (II-5) इति राक्षसस्योक्तिः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रासादादिवासतत्परः स : । मण्डनप्रियश्च । 'परिरङ्गुलिभिर्नवेन्दु वदहं निर्दिश्यमानः शनैः यो राजवत्पुरा पुरान्निरगमं राज्ञां सहस्रैर्वृतः (VI. 10) इति निर्विण्णवचनादस्य परिच्छदबाहुल्यं राजवत् विषयोपभोगाभिमुख्यं च विभाव्यते । मलयकेतुरपि स्वगात्रादवतार्या- भरणानि चिरात्परित्यक्तोचितसंस्कारः इति राक्षसाय प्रेषयति । चाणक्यश्च पर्वतेश्वरधृतान्याभरणानि राक्षसाय विक्रेतुं विश्वावसुप्रभृतीन् प्रेरयति । अत एव च 'न युक्तमनलङ्कृतैः कुमार-दर्शनमनुभवितुम्' इति राक्षसः पञ्चमे अङ्के प्रस्तौति । अस्य दृढां स्वामि भक्तिमुपलभ्यैव चन्द्रगुप्तस्य साचिव्ये अनेन गृहीते, चन्द्रगुप्ते राज्यलक्ष्मीः स्थिरीकृता भवेत्' इति निश्चित्य एतत्सङ्ग्रहणे महान्तमुद्यममातिष्ठते चाणक्यः । एतच्च—

ऐश्वर्यादनपेतमीश्वरमयं लोकेऽर्थतः सेवते
तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठशया ।।

भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया
भक्त्या कार्यधुरं वहन्ति बहवस्ते दुर्लभास्त्वादृशाः ।।

(I.-14), अत एवास्माकं त्वत्सङ्ग्रहे यत्न इत्यनेन विशदी क्रियते । अत एव भागुरायणनिकटेऽपि 'रक्षणीया राक्षसस्य प्राणा' इत्यादिष्टमनेन ।

सर्वशास्त्रनिष्णातश्चाणक्यः । यमपटं प्रदर्श्य धर्मोपदेशं कर्तुमागतं चरमुद्दिश्य 'सर्वज्ञतामाचार्यस्य चोरयितुमिच्छति' इति च वदतःशिष्यस्य मुखेनेदं प्रकटीक्रियते । 'आकरः सर्वशास्त्रणाम्' इति राक्षसोऽप्येनं स्तौति । राक्षसोऽपि प्राज्ञाग्रणीः । राजतन्त्रकुशलः । प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(I.14) इति चाणक्यो राक्षसं प्रशंसति । अत एव 'साधु' अमात्यराक्षस साधु, साधु श्रोत्रिय साधु, साधु मन्त्रिबृहस्पते साधु' इति त्रिधा सम्बोधनं चाणक्येनाकारि । अस्याप्यर्थनैरपेक्ष्यादेव शकटदासं महता कोशसञ्चयेन संस्थापयामास । 'नात्मप्रतिष्ठार्थिना' इति चेदमेव स्फुटीक्रियते । महाबुद्धिमतः चाणक्यस्य न किंचिदेतत्प्रतिज्ञासरिदुत्तरणं यदि राक्षसस्तदा नासीत्। 'विवादश्च विवाहश्च समयोरेव शोभते' इति ह्याभाणकः। एवं समबुद्धिबलयोः कौटिल्यकः- राक्षसयोः मौर्ये राज्यलक्ष्मीस्थिरीकरणाय तदपकर्षाय च क्रियमाणः प्रयत्नः अद्भुतं रसमावहति।

'कौटिल्यधीरज्जुनिबद्धमूर्तिं मन्ये स्थिरां मौर्यनृपस्य लक्ष्मीम् । उपायहस्तैरपि राक्षसेन निकृष्यमाणामिव लक्षयामि ।। (II.2)

इति युक्तमुपवर्ण्यते विराधगुप्तेन । महापण्डिताभ्यामिव प्रवर्त्यमानः वाक्यार्थः अनयोरुपाय - तत्प्रतिकारचिन्तनादिकं विदग्धचेतांसि समुल्लासयति । कौटिल्यं कुटिलं नयनमहर्दिवं विचिन्त्य जाग्रत एव राक्षसस्य याति यामिनी।

मम विमृशतः कार्यारम्भे विधेरविधेयतां
सहजकुटिलां कौटिल्यस्य प्रचिन्तयतो मतिम्।
अपि विहिते मत्कृत्यानां निकाममुपग्रहे
कथमिदमिहेत्युन्निद्रस्य प्रयात्यनिशं निशा ।। (IV-2)

न केवलमयमेव निर्निद्रःक्षपां क्षपयति । चाणक्यस्यापि स्वपितुं नायमवकाशं वितरति । एतत्कृत्यानां चाणक्येनोपग्रहः तथा तस्याप्यनेन महानायास उदपादि।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गुरुभिः कल्पनाक्लेशैर्दीर्घजागरहेतुभिः ।
चिरमायासिता सेना वृषलस्य मतिश्च मे ।। (VII.8)

इति हि चारणक्योऽस्य माहात्म्यं प्रतिपद्यते । चन्द्रगुप्तोऽपि 'अत्यर्थं विपुलैः सुनीतिविभवैः संमोहमापादिता विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्गेषु नः । (III.26) इति राक्षसस्य प्रभावं स्तौति । अत एवेदृशस्य बुद्धिभक्तिविक्रमादिगुणभूयिष्ठस्य दैवप्रातिकूल्येन विघटितेष्वपि सर्वेषु प्रयत्नेषु महताऽबधानेन प्राणरक्षणं कर्तव्यमित्युद्यमः कृतः कौटिल्येन । 'स हि भृशमभियुक्तो यद्युपेयाद्विनाशं ननु वृषल वियुक्तास्तादृशेनापि पुंसा (III-25) इत्येतदेव प्रकटीकृतम् ।

एवमर्थानपेक्षित्वादेव क्षोत्रियेति सम्बोधनम् । किं च श्रोत्रियत्वस्य विक्रमस्य चैकत्रावस्थानं न संभवति । त्वयि तदुभयमप्यस्तीति तथा सम्बोधनम् । अपि च मन्त्रिणो मन्त्रयितुं प्रभवः । नोजायितुं नापि स्वर्गतं स्वामिनमुपासितुम् । त्वयि तु तत्सर्वमस्तीति त्रिविधं सम्बोधनम् । 'प्रज्ञा विक्रमभक्तय' इति पदेनापि अस्यैव भङ्गयन्त रेणानुवादः । (अनुवर्तते)

शशिश्रियेव रजनी लीलयेव वराङ्गना ।
शोभते क्षमयैवासौ महतां किल शक्तता ।।

சந்திரனின் ஒளியழகான நிலவால்இரவு போலவும், ஓய்யார விளையாட்டால் சிறந்த நங்கை போலவும் சான்றோரின் செயல் திறன் வலிமை பொறுமையால் தான் அழகு பெறுகிறது.

--க்ஷேமேந்த்ரர் - பாரதமஞ்ஜரீ 3.226

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दुष्कर राजसेवनम् ।

अत्युत्तमं विद्यादातृपदम् । अनघं तत् श्रेयस्करं आनृण्य-सम्पादकंम् । तदिदानीं काराप्रापकं राजद्रोहकरं सम्पन्नमिति नितरां विषादास्पदम् । विद्याशालास्तत्र तत्र स्वतन्त्रा आसन् पूर्वम् । वेतनादिविषये अन्यवैतनिक साम्य विचिकित्साया अवकाश एव नासीत् । कालो मोहकः सर्वेषाम् । वृत्तिनैरन्तर्यं राजकीयत्वे सम्पद्येतेति सर्वत्र राजकीयता अनुप्रवेशिता अजानद्भिरेव भाविनं प्रलयम् । सर्वा वृत्तिः राजकीया सम्पन्ना । प्रभूतमधिकारं कोटिबलेन लब्धवन्तः शासकपक्षीयाः, प्रकृतिः अशनायापिपासाशमनार्थेऽपि अस्वतन्त्राः क्रमेण कुर्वन्तो वर्तन्ते ।

सर्वे वेतने वृद्धिमपेक्षन्ते । तां वृद्धिं क्रय्यार्घवृद्ध्यर्थं प्रतीक्षन्ते वणिजः । क्रय्यार्घवृद्ध्यनुगुणा वेतन वृद्धिः, वेतनवृद्ध्युत्तरक्षणे अर्घवृद्धिः इति विषकल्पा परिणतिः । सर्वत्र अशान्तिः फलम् । मिथः कलहवर्धनेन तुष्यति शासनाधिकृतः । अशान्तिरेव तस्य जीवातुः । वेतनकल्पने केषाञ्चित् समानयोगक्षेमाणां उत्तमं भागं परिकल्पयति । ते तुष्टाः वैतनिकसमुदायात् पृथग्भूतं आत्मानं कलयन्ति । उत्तमं भागं न लब्धवन्तः केचित् । ते कलहायन्ते । उत्तमभागभाजस्तु न तत्र सहयोगिनः । द्वेषेऽसूया च वर्धते । स्वस्ति प्रजाभ्यः इति आशास्तिः दूरे ।

आनन्दराघवं नाम नाटकं राजचूडामणिदीक्षितकृतम् । तत्रैव उपक्षिप्तम् ।

''राज्यश्रीतिमिरोपरुद्धनयना राजन्यदुर्मेधसः
प्राज्ञेमन्यतयाऽपथे प्रथमतः प्रायः पदं कुर्वते ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कुतः एवम्?

''कार्याकार्यविचारदूरमतयः प्रायेण राजाधमाः
प्राज्ञंमन्यतया स्वयं प्रथमतः कुर्वन्ति यत्किञ्चन।''

तत्र किं वा कर्तव्यं प्रकृतिभिः?

''प्राप्तस्नेहरसाः प्रबोध्य झटिति प्रज्ञामयीं दीपिकां तन्वानाः पथि
तान् पुनः।''

यदि प्रकृतयः तत्र न प्रभवन्ति ?

''प्रकृतयः ताम्यन्ति नक्तन्दिवम्।''

यदि शक्नुवन्ति?

''तच्चेन्मन्त्रिजनैः सुघटितं स्वायत्तमाचक्षते।''

यदि कृतं न सम्यक् फलति?

''दिष्ट्या चेद्धितथीकृतं प्रकृतयः तत्रापराधास्पदम्।''

तदापि प्रकृतय एव क्लिश्यन्ति।

कविरयं क्रान्तदर्शी इति नः समेषां अनुभवः निरूपयति।

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात्।
साधनं प्रभवेत् पुंसां वैराग्यादिचतुष्टयम्॥

By (following) one's own Varnasrama Dharma, by austerity, and by pleasing Hari, the four fold means consisting of dispassion etc., is generated for human beings.

—*Sri Sankara Aparokshanubhuti.*

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'Hi- Energy' Silver Zinc
Nickel Cadmium Cells

UNIQUE FEATURES

High Energy Density * Capability of very High rate discharge * Long life * Economical * Extremely Rugged * Wide Range

For further details please contact / write to:

High Energy Batteries (India) Limited
(FORMERLY SIMCO METTERS LTD. BATTERY DIVISION)
MATHUR - 622 515
(PUDUKKOTTAI DISTRICT)
Regd. Office:
Eswin House, Perungudi, Chennai - 600 096

With best Compliments

SRI S.V. PARASURAMAN
(Proprietor)

RAM ENTERPRISES
Mylapore, Chennai - 4
Dealer :

Hindustan Petrolium Corporation Ltd.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Date of Publication : 10th of every month

Registration No. TN / CH (C) / 226 / 09 -- 11 WPP 289 / 09 - 11

Registration with Registrar News Paper of India 30478 / 77

SAMSKRITASRI

With best compliments from :

LITEROOF

(Poineers in Manufacture of Asphaltic Corrugated & Plain Roofing Sheets)

NEW TUF-10 SER

(Janatha - Deluxe - Expodel Expo - 10

LITEROOF

IS

(Economical * Flexible * Durable * Weather Proof

* Fire-Resistant

LITEROOF

FOR

*Factories - Theatres * Schools * Housing * Poultry *

Dairy Farms etc.,

LR

LIGHT ROOFINGS LIMITED

No. 35, 7th Street, V.S.I. Estate Phase II,
Thiruvanmiyur, Chennai - 600 041
Phone : 2454 4949 * 2454 4950

Printed by : Zigma Graphics, 9/1, Sitharappan Street, Triplicane-5

Edited and Published by Sri S. Srinivasa Sarma on behalf of the Samskrit Education Society (Regd.)

283, T.T.K. Road, Chennai-600018.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,